आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे ॥
निःस्वानां रोमशौ ह्रस्वौ श्रेष्ठौ करिकरप्रभौ ।”
इति गारुडे ६६ अध्यायः ॥
(हस्तिशुण्डः । यथा, महाभारते ।३।२७०।२१।
“नकुलस्तस्य नागस्य समीपपरिवर्त्तिनः ।
सविषाणं भुजं मध्ये खड्गेन निरकृन्तत ॥”)
ग्रहस्फुटीकरणार्थं राशित्रयादूनकेन्द्रग्रहादिः ।
राशित्रयादधिकनवपर्य्यन्तषड्न्तरितावशेषः ।
नवराशिभ्योऽधिकं चेत् तदा द्वादशराशिभ्यः
शोध्यश्च भुजः स्यात् । यथा,—
“दोस्त्रिभोनं त्रिभोर्द्ध्वं विशोध्यं रसै-
श्चक्रतोऽङ्काधिकं स्याद्भुजोनं त्रिभम् ।
कोटिरेकैककं त्रित्रिभैः स्यात् पदं
स्पष्टमन्दोच्चमध्याश्रयोऽंशा भवेत् ॥”
इति ग्रहलाघवम् ॥
क्षेत्रस्य परिमाणविशेषः । यथा,—
“कोटिश्चतुष्टयं यत्र दोस्त्रयं तत्र का श्रुतिः ।
कोटिं दोः कर्णतः कोटिश्रुतिभ्याञ्च भुजं वद ॥
इष्टो बाहुर्यः स्यात्तत्स्पर्द्धिन्यां दिशीतरो बाहुः ।
त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः ॥
तत्कृत्योर्योगपदं कर्णः दोः कर्णवर्गयोर्विवरात् ।
मूलं कोटिः तच्छ्रुतिकृत्योरन्तरात् पदं बाहुः ॥”
इति लीलावत्यां क्षेत्रव्यवहारः ॥
भुजकोटरः, पुं, ( भुजस्य कोटर इव । ) कक्षः ।
इति हेमचन्द्रः । ५ । २५३ ॥
भुजगः, पुं, ( भुजं वक्रं गच्छतीति । गम्+डः । ३ ।
२ । ३८ इत्यत्र “खच डिद्वाच्यः ।” वार्त्तिकोक्तेः
डित् । ततः टिलोपः । ) सर्पः । इत्यमरः ।
१ । ८ । ६ ॥ ( यथा, मेघदूते । ६२ ।
“तस्मिन् हित्वा भुजगवलयं शम्भुना दत्तहस्ता ।
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ॥”)
भुजगदारणः, पुं, ( भुजगं दारयतीति । दॄ+
णिच्+ल्युः । ) गरुडः । इति राजनिर्घण्टः ॥
भुजगाभोजी, [न्] पुं, ( भुजगं आ सम्यक्प्रकारेण
भुङ्क्ते इति । भुजग+आ+भुज+णिनिः । )
मयूरः । इति राजनिर्घण्टः ॥
भुजगान्तकः, पुं, ( भुजगस्य अन्तकः । ) गरुडः ।
इति राजनिर्घण्टः ॥
भुजगाशनः, पुं, ( भुजगमश्नातीति । अश+ल्युः ।
भुजगः अशनं यस्येति वा । ) गरुडः । इति
त्रिकाण्डशेषः ॥
भुजङ्गः, पुं, ( भुजं वक्रं गच्छतीति । गम+खच् ।
“खच डिद्वाच्य” इति वार्त्ति डित्त्वपक्षे टिलोपः । )
सर्पः । ( यथा, रघुः । ६ । ७६ ।
“आक्रान्तपूर्व्वमिव मुक्तविषं भुजङ्गं
प्रोवाच कोशलपतिः प्रथमापराद्धः ॥”)
विटः । इत्यमरः । १ । ८ । ६ । मेदिनी च ॥
( सीसम् । तद्यथा,—
“सीसं वध्रञ्च वप्रञ्च योगेष्टं नागनामकम् ॥”
नागनामकम् । नागः भुजङ्ग इत्यादि । )
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
अपरञ्च तदर्थे ।
“त्रिंशद्भागा भुजङ्गस्य गन्धपाषाणपञ्चकम् ॥
सुरतालकयोर्द्वौ द्वौ वङ्गस्यैकोऽञ्जनात्त्रयम् ।
अन्धमूषीकृतं ध्मातं पक्वं विमलमञ्जनम् ॥”
इति वाभटे उत्तरतन्त्रे त्रयोदशेऽध्याये ॥)
भुजङ्गघातिनी, स्त्री, ( भुजङ्गं सर्पं तद्विषं वा
हन्तीति । हन+णिनिः । स्त्रियां ङीप् । )
क्षुपविशेषः । कङ्कालिका इति ख्यातः । तत्-
पर्य्यायः । छरिः २ सर्पाक्षी ३ छत्रकारी ४
सुहा ५ । इति शब्दचन्द्रिका ॥ सर्पनाशिनी च ॥
भुजङ्गजिह्वा, स्त्री, ( भुजङ्गस्य जिह्वेव आकृति-
र्यस्याः । ) महासमङ्गा । इति राजनिर्घण्टः ॥
( भुजङ्गस्य जिह्वा । ) सर्परसना च ॥ (विवरण-
मस्या महासमङ्गाशब्दे ज्ञातव्यम् ॥)
भुजङ्गप्रयातं, क्ली, ( भुजङ्गवत्प्रयातं गतिरिव
भङ्गीमान् शब्दविन्यासो यस्य । ) द्वादशाक्षर-
पादच्छन्दः । यथा, कालिदासकृतश्रुतबोधे ।
“यदाद्यञ्चतुर्थन्तथा सप्तमञ्चेत्-
तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥”
( अधिकन्तु छन्दःशब्दे ज्ञातव्यम् । )
भुजङ्गभुक्, [ज्] पुं, ( भुजङ्गं भुङ्क्ते इति । भुज्+
क्विप् । ) गरुडः । इति शब्दरत्नावली ॥ मयूरः ।
इत्यमरः । २ । ५ । ३० ॥ ( मयूरार्थे पर्य्यायो
यथा,—
“मयूरश्चन्द्रकी केकी मेघरावो भुजङ्गभुक् ।
शिखी शिखावलो बर्हौ शिखण्डी नीलकण्ठकः ॥
शुक्लापाङ्गः कलापी च मेघनादः कलाप्यपि ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे ॥)
भुजङ्गभोजी, [न्] पुं, ( भुजङ्गं भुङ्क्ते इति ।
भुज+णिनिः । ) राजसर्पः । इति हेमचन्द्रः ॥
भुजङ्गमः, पुं, ( भुज कौटिल्ये+इगुपधेति कः ।
भुजः कुटिलीभवन् गच्छतीति । भुज+
गम्+“गमेः सुपि वाच्यः ।” ३ । १ । ३८ ।
इत्यस्य वार्त्तिकात् खच् । “खच डिद्वाच्यः ।” इति
डिद्भावे टिलोपाभावः । ) सर्पः । इत्य-
मरः । १ । ८ । ६ । ( यथा, रघुः । ६ । ७७ ।
“आरूढमद्रीनुदधीन् वितीर्णं
भुजङ्गमानां वसतिं प्रविष्टम् ॥” )
सीसके, क्ली । इति राजनिर्घण्टः ॥
भुजङ्गलता, स्त्री, ( भुजङ्गवत् कुटिला तत्प्रिया
वा लता । ) नागवल्ली । इति राजनिर्घण्टः ॥
भुजङ्गहा, [न्] पुं, ( भुजङ्गं हन्तीति । हन्+
क्विप् । ) गरुडः । इति त्रिकाण्डशेषः ॥
भुजङ्गाक्षी, स्त्री, (भुजङ्गस्य अक्षीव पुष्पं यस्याः ।
“अक्ष्णोऽदर्शनात् ।” ५ । ४ । ७६ । इति अच् ।
गौरादित्वात् ङीष् । ) रास्ना । इत्यमरः ।
२ । ४ । ११५ ॥ (रास्ना मेदनाइ इति लोके ।
तथास्याः पर्य्यायान्तरम् ।
“नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
भुजङ्गाख्यः, पुं, (भुजङ्गस्य आख्या आख्या यस्य ।)
नागकेशरः । इति शब्दमाला सर्पनामके,
त्रि ॥
भुजशिरः, [स्] क्ली, ( भुजस्य शिर इव । )
स्कन्धः । इत्यमरः ॥ २ । ६ । ७८ ॥
भुजा, स्त्री, (भुज+टाप् । ) बाहुः । करः । इति
मेदिनी । जे, १३ ॥ (यथा, शिशुपालवधे । ७ । ७१ ।
“अविरतकुसुमावचायखेदा-
न्निहितभुजालतयैकयोपकण्ठम् ॥”)
भुजाकण्टः, पुं, ( भुजायाः करस्य कण्ट इव । )
हस्तनखः । इति हेमचन्द्रः ॥
भुजादलः, पुं, ( भुजाया बाहोर्दल इव । ) हस्तः ।
इति त्रिकाण्डशेषः ॥
भुजान्तरं, क्ली, (भुजयोरन्तरं मध्यम् । ) क्रोडम् ।
इत्यमरः । २ । ६ । ७७ ॥ (वक्षः । यथा, रघुः । ३ । ५४ ।
“दिलीपसूनोः स बृहद्भुजान्तरं
प्रविश्य भीमासुरशोणितोचितः ।
पपावनास्वादितपूर्ब्बमाशुगः
कुतूहलेनेव मनुष्यशोणितम् ॥”
भुजस्यान्तरं प्रभेदः । ) हस्तप्रभेदश्च ॥
भुजिः, पुं, ( भुनक्ति भुङ्क्ते वा सर्व्वानिति ।
भुज+“भुजेः किच्च ।” उणा० ४ । १४१ । इति
इः । स च कित् । सर्व्वभक्षकत्वादस्य तथा-
त्वम् । ) वह्निः । इत्युणादिकोषः ॥ (भुज+भावे
इः । भोगः । यथा, ऋग्वेदे । ८ । ६१ । ६ ।
“आसवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं समुद्रवाससम् ॥”
“सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव
भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च
समुद्र वाससमग्निं आहुवे आह्वयामि ।” इति
तद्भाष्ये सायनः ॥ * ॥ भोक्तरि, त्रि । यथा,
ऋग्वेदे । ८ । ८ । २ ।
“भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥”
“हे भुजी हविषां भोक्तारौ ।” इति तद्भाष्ये
सायनः ॥ )
भुजिष्यः, पुं, ( भुङ्क्ते स्वाम्युच्छिष्टमिति भुज्यते
इति वा भुज+“रुचिभुजिभ्यां किष्यन् ।”
उणा० ४ । १७८ । इति किष्यन् । ) स्वतन्त्रः ।
हस्तसूत्रम् । दासः । इति मेदिनी । ये, ६८ ॥
( यथा, माघे । १५ । ६३ ।
“किमहो नृपाः सममभीभि-
रुपपतिसुतैर्न पञ्चभिः ।
वध्यमभिहत भुजिष्यमसुं
सह चानया स्थविरराजकन्यया ॥”)
रोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥
भुजिष्या, स्त्री, ( भुजिष्य+टाप् । ) दासी ।
( यथा, रघुः । ६ । ५३ ।
“अथाङ्गदाश्लिष्टभुजं भुजिष्या
हेमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितशत्रुपक्षं
बालामबालेन्दुमुखीं बभाषे ॥” )
गणिका । इति मेदिनी । ये, ६६ ॥